# नलोपाख्यानम्

## 8

बृहदश्व उवाच।

दमयन्ती ततो दृष्ट्वा पुण्यश्लोकं नराधिपम्।
उन्मत्तवदनुन्मत्ता देवने गतचेतसम्॥ ३-५७-१ ॥
भयशोकसमाविष्टा राजन्भीमसुता ततः।
चिन्तयामास तत्कार्यं सुमहत्पार्थिवं प्रति॥ ३-५७-२ ॥
सा शङ्कमाना तत्पापं चिकीर्षन्ती च तत्प्रियम्।
नलं च हृतसर्वस्वमुपलभ्येदमब्रवीत्॥ ३-५७-३ ॥
बृहत्सेने व्रजामात्यानानाय्य नलशासनात्।
आचक्ष्व यद्धृतं द्रव्यमवशिष्टं च यद्वसु॥ ३-५७-४ ॥

bṛhatsenā – *nom.pr.;*

ततस्ते मन्त्रिणः सर्वे विज्ञाय नलशासनम्।
अपि नो भागधेयं स्यादित्युक्त्वा पुनराव्रजन्॥ ३-५७-५ ॥
तास्तु सर्वाः प्रकृतयो द्वितीयं समुपस्थिताः।
न्यवेदयद्भीमसुता न च तत्प्रत्यनन्दत॥ ३-५७-६ ॥
वाक्यमप्रतिनन्दन्तं भर्तारमभिवीक्ष्य सा।
दमयन्ती पुनर्वेश्म व्रीडिता प्रविवेश ह॥ ३-५७-७ ॥
निशम्य सततं चाक्षान्पुण्यश्लोकपराङ्मुखान्।
नलं च हृतसर्वस्वं धात्रीं पुनरुवाच ह॥ ३-५७-८ ॥
बृहत्सेने पुनर्गच्छ वार्ष्णेयं नलशासनात्।
सूतमानय कल्याणि महत्कार्यमुपस्थितम्॥ ३-५७-९ ॥

vārṣṇeya – *nom.pr.;*

बृहत्सेना तु तच्छ्रुत्वा दमयन्त्याः प्रभाषितम्।
वार्ष्णेयमानयामास पुरुषैराप्तकारिभिः॥ ३-५७-१० ॥
वार्ष्णेयं तु ततो भैमी सान्त्वयञ्श्लक्ष्णया गिरा।
उवाच देशकालज्ञा प्राप्तकालमनिन्दिता॥ ३-५७-११ ॥
जानीषे त्वं यथा राजा सम्यग्वृत्तः सदा त्वयि।
तस्य त्वं विषमस्थस्य साहाय्यं कर्तुमर्हसि॥ ३-५७-१२ ॥
यथा यथा हि नृपतिः पुष्करेणैव जीयते।

तथा तथास्य द्यूते वै रागो भूयो ऽभिवर्धते॥ ३-५७-१३॥

यथा च पुष्करस्याक्षा वर्तन्ते वशवर्तिनः।

तथा विपर्ययश्चापि नलस्याक्षेषु दृश्यते॥ ३-५७-१४॥

सुहृत्स्वजनवाक्यानि यथावन्न शृणोति च।

नूनं मन्ये न शेषो ऽस्ति नैषधस्य महात्मनः॥ ३-५७-१५॥

यत्र मे वचनं राजा नाभिनन्दति मोहितः।

शरणं त्वां प्रपन्नास्मि सारथे कुरु मद्वचः।

न हि मे शुध्यते भावः कदाचिद्विनशेदिति॥ ३-५७-१६॥

नलस्य दयितानश्वान्योजयित्वा महाजवान्।

इदमारोप्य मिथुनं कुण्डिनं यातुमर्हसि॥ ३-५७-१७॥

मम ज्ञातिषु निक्षिप्य दारकौ स्यन्दनं तथा।

अश्वांश्चैतान्यथाकामं वस वान्यत्र गच्छ वा॥ ३-५७-१८॥

दमयन्त्यास्तु तद्वाक्यं वार्ष्णेयो नलसारथिः।

न्यवेदयदशेषेण नलामात्येषु मुख्यशः॥ ३-५७-१९॥

तैः समेत्य विनिश्चित्य सो ऽनुज्ञातो महीपते।

ययौ मिथुनमारोप्य विदर्भांस्तेन वाहिना॥ ३-५७-२०॥

हयांस्तत्र विनिक्षिप्य सूतो रथवरं च तम्।

इन्द्रसेनां च तां कन्यामिन्द्रसेनं च बालकम्॥ ३-५७-२१॥

आमन्त्र्य भीमं राजानमार्तः शोचन्नलं नृपम्।

अटमानस्ततो ऽयोध्यां जगाम नगरीं तदा॥ ३-५७-२२॥

ऋतुपर्णं स राजानमुपतस्थे सुदुःखितः।

भृतिं चोपययौ तस्य सारथ्येन महीपते॥ ३-५७-२३॥